श्रीमते रामानुजाय नमः

# ॥ श्रीमद् भगवद्गीता ॥

## ॥ अथ द्वादशोऽध्यायः (भक्तियोगः) ॥

### अर्जुन उवाच

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरं अव्यक्तं तेषां के योगवित्तमाः ॥ १

### श्री भगवान् उवाच

मय्यावेश्य मनो ये मां नित्य युक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २

ये त्वक्षरमनिर्देश्यं अव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मां एव सर्वभूतहिते रताः ॥ ४

क्लेशोऽधिकतरस्तेषां अव्यक्तासक्त चेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६

तेषामहं समुद्धर्ता मृत्यु संसार सागरात्।
भवामि नचिरात् पार्थ मय्यावेशित चेतसाम् ॥ ७

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवासिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥ ८

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्।
अभ्यास योगेन ततो माम् इच्छाप्तुं धनञ्जय॥ ९

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन् सिद्धिं अवाप्स्यसि॥ १०

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्व कर्म फल त्यागं ततः कुरु यतात्मवान्॥ ११

श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद् ध्यानं विशिष्यते।
ध्यानात् कर्म फल त्यागः त्यागाच्छान्तिः अनन्तरम् ॥ १२

अद्वेष्टा सर्व भूतानां  मैत्रः करुण एव च।
निर्ममो निरहङ्कारः सम दुःख सुखः क्षमी॥ १३

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ १४

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैः मुक्तो यः स च मे प्रियः॥ १५

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भ परित्यागी यो मद्भक्तः स मे प्रियः॥ १६

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभ परित्यागी भक्तिमान् यः स मे प्रियः ॥ १७

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्ण सुख दुःखेषु समः सङ्गविवर्जितः ॥ १८

तुल्य निन्दा स्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः ॥ १९

ये तु धर्म्यामृतं इदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परम भक्तास्तेऽतीव मे प्रियाः ॥ २०

**ॐ तत्सदिति श्रीमद् भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे**
**श्रीकृष्णार्जुन संवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥**